# श्रीसोमनाथसंस्कृतयुनिवर्सिटी ,वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल-२०१९

| | | |
|---|---|---|
| कक्षा–आचार्यद्वितीयवर्षम्(SEM- 4) | **प्रश्नपत्रम् –२** | गुणा: - ७० |
| विषय: - नव्यव्याकरणम् | **कोड – CC 5.4.10** | समय: - ११ त: ०२ |
| दिनाङ्क: - ३० -०३ -२०१९ | सन्दर्भग्रन्थः – परमलघुमञ्जूषा , व्युत्पत्तिवाद: \| | |

**प्रथमान्विति:**

प्रश्न:-१ नामार्थविषयकं मीमांसकमतं समुपस्थापनीयम् | **(५)**

अथवा

लिङ्गस्यनामार्थत्वं प्रतिपादनीयम् |

**प्रश्न:-२** परमतखण्डनपुरःसरं नामार्थविषयकं वैयाकरणमतम् उल्लेखनीयम् | **(१०)**

अथवा

अनुकरणाऽनुकार्ययो: भेदाऽभेदविवक्षापक्षविषयकं समग्रं विषयवस्तु सावतरणं यथाग्रन्थं स्पष्टयतु ।

**द्वितीयान्विति:**

**प्रश्नः-३** जहत्स्वार्थाऽजहत्स्वार्थावृत्तिद्वयं परमलघुमञ्जुषानुसारं सावतरणं सोदाहरणं च व्याख्येयम् । **(५)**

अथवा

आख्यातं तद्धितकृतोर्यत्किञ्चिदुपदर्शकम् | गुणप्रधानभावादौ तत्र दृष्टो विपर्यय: ||
अस्या: कारिकाया: सप्रसङ्गं व्याख्या कार्या |

**प्रश्न-४** समासादि वृत्तिविषयकं व्यपेक्षावादीनां मतं समुपस्थापनीयम् | **(१०)**

अथवा

परमतखण्डनपुर:सरं समासादि वृत्तिविषयकं वैयाकरणमतं प्रतिपादनीयम् |

**तृतीयान्विति:**

प्रश्न:-५ **निम्नलिखितयोरेकस्य गद्यखण्डस्य सप्रसङ्गं व्याख्या कार्या |** **(५)**

मैवम्, यत्रविशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्यया अविवक्षिततत्वं तत्र विशेष्यविशेषणपदयो: समानकत्वनियम: | अत एव “पुरूरवोमाद्रवसो विश्वेदेवा:” इत्यादौ द्वित्वविशिष्टयो:पुरूरवोमाद्रव: प्रभृत्योर्विशेषणतया विवक्षिततत्वात् तद्वाचकस्य पदस्य द्विवचनान्तता |

अथवा

यदि स्वाश्रय प्रकृत्यर्थतावच्छेदकवत्वसम्बन्धेन प्रकृत्यर्थ एवैकत्वान्वय:, व्रीहित्वजाते: स्वरूपत एव व्रीह्यादिपदशक्त्यतावच्छेदकतयाऽन्वितावच्छेदकरूपेणाऽनुपस्थितेस्तत्र पदार्थान्तरस्यान्वयानुपपत्तिरिति मन्यते | तदा प्रकृतेऽपीदृशयेव गति: |

प्रश्नः-६ 'शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते' इति वाक्य **(१०)**
घटकीभूतयोरेकत्वापरत्वयोरन्वयस्थलं प्रदर्श्य संसर्गमर्यादया इत्यस्यार्थं स्पष्टयन्तु |

अथवा

'साजात्यञ्च विभक्तिविभाजकप्रथमात्वादिना, न तु समानानुपूर्विकत्वं साजात्यम्
इति ग्रन्थं सावतरणं व्याकृत्य ग्रन्थकाराभिमतं साजात्यं निरूपयत |

प्रश्नः-७ निम्नलिखितयोरेकस्य गद्यखण्डस्य सप्रसङ्गं व्याख्या कार्या **(५)**
प्रकृत्येकदेशसाधारणतादृशविभक्तिप्रकृतित्वस्य प्रयोजकत्वे तत्र ल्युडादेरधिकरणपरत्वेऽ तथाविधान्बोधापत्तेः | कस्यचित् प्रतिबन्धकतां कल्पयित्वा तद्वारणे च गौरवात् |

अथवा

वस्तुतस्तु तत्रोत्तरपदार्थविशेषितपूर्वपदार्थसमीपार्धादौ प्रत्ययार्थान्वयाबोधे तादृश समस्तपदप्रत्ययपदयोरव्यवहितपूर्वापरीभावोऽप्याकाङ्क्षा एवं तत्र प्रातिपदिकान्तरार्था भेदान्वयबोधे समानविभक्तिकयोस्तादृशसमस्तपदपदान्तरयोश्चसमभिव्याहारोप्याकाङ्क्षा, तथा सति अतिप्रसङ्गविरहात् |

प्रश्नः-८ क्रियाविशेषणानाम् अभेदान्वयाकाङ्क्षास्वरूपं निरूपयत | **(१०)**

अथवा

घटो घटः इत्यत्र शाब्दबोधवारणाय किमभिहितं व्युत्पत्तिवादप्रणेत्रेति स्वशब्दैः लेखनीयम् |

प्रश्नः-९ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशप्रश्नानां लघूत्तरं देयम्| **(१०)**

(१) मीमांसकमते शब्दानां कुत्र शक्तिर्विद्यते ?
(२) कति नामार्थाः सन्ति ?
(३) अनुकरणाऽनुकार्ययोः भेदविवक्षापक्षस्य किमुदाहारणम् ?
(४) अनुकरणाऽनुकार्ययोः अभेदविवक्षापक्षस्य किमुदाहारणम् ?
(५) शब्दः कतिविधः ?
(६) 'रथन्तरम्' कस्य शब्दस्य उदाहरणम् ?
(७) 'पाचिका' कस्य शब्दस्य उदाहरणम् ?
(८) 'वैयाकरणः' इत्यस्य किं विवरणवाक्यम् ?
(९) व्युत्पत्तिवादस्य कः विग्रहः ?
(१०) नीलो घटः इति कस्य सम्बन्धस्य उदाहरणम् ?
(११) 'विंशत्याद्याः सदैकत्वे' इत्यनुशासनं कस्य साधुत्वे प्रमाणम् ?
(१२) व्युत्पत्तिवादस्य कर्ता कः ?
(१३) क्रियाविशेषणे किं लिङ्गं भवति ?
(१४) क्रियाविशेषणे किं कारकं भवति ?
(१५) स्तोकं पचति इत्यत्र स्तोक पदार्थस्य कुत्र अन्वयो भवति ?